CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पं॰ चन्द्रका नाथ शर्मा

अथ ककारादि कालिकासहस्रनाम प्रारम्भः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यहाँ पौड्याल्त चन्द्रका नौं द्दनाउ धरामे ब्लेरी पोरव-पाल्तयोक गाउ-द्धि हातजोरवैत्रि गर्दुम पैँले चो

॥ नीमाहा मनून दीउन्क सैले ॥१॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री चन्द्रकान्तशर्मणः

श्रीगणेशाय नमः ॥ * ॥ श्रीकालिकायै नमः ॥ * ॥ कैलाश
शिखरेरम्ये नानादेवगणावृते ॥ नानाबृक्षलताकीर्णे नानाप
क्षिरवैर्युते ॥ १ ॥ चतुर्मण्डलसंयुक्ते सृङ्गारमण्डपोस्थितम् ॥
समाधौसंस्थितंशान्तं क्रीडन्तंयोगिनिप्रियम ॥ २ ॥ तत्रमौ
नधरंदृष्ट्वा देविपृच्छतिशंकरम ॥ श्रीदेव्युवाच ॥ किन्त्वया
जप्यतेनाथ किंत्वयास्मर्यतेसदा ॥ ३ ॥ सृष्टिःकुत्रविलिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का. स्ति पुनः कुत्र प्रजायते ॥ ब्रह्माण्डकारणं किं तत्किमाद्यं कारणं
१ महत् ॥ ४ ॥ मनोरथमयीसिद्धि स्तथावाञ्छामयीशिव ॥ स.
तृतीयाकल्पनासिद्धिः कोटिसिद्धिश्वरत्वकम् ॥ ५ ॥ शक्ति
पाताष्टदशकं चराचरपुरीगतिः ॥ महेन्द्रजालमिन्द्रादि जा
लानांरचनातथा ॥ ६॥ अणिमाखेचरत्वंच परकायप्रवेशनम् १
नवीनसृष्टिकरणं समुद्रशोषणंतथा ॥ ७ ॥ अमायांचन्द्रसंद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शौं दिबाचन्द्रप्रकाशनम् ॥ चन्द्राष्टकंचाष्टादिक्षु तथासूर्या
ष्टकंशिवं ॥ ८ ॥ जलेजलमयत्वंच बह्नौबाह्निमयत्वकम् ॥ ब्र
ह्मबिष्णवादिनिर्माण मिन्द्राणांकरणंपरम् ॥ ९ ॥ पादुकागु
टिकायक्ष बेतालपंचकंतथा ॥ रसायनंतथागुप्तिस्तथैबचाबि-
लाञ्जनम् ॥ १० ॥ महामधुमतीसिद्धिस्तथापद्मावतीशिव ॥
तथाभोगवती शिद्धिर्याबन्त्यःसन्तिसिद्धयः ॥ ११ ॥ केनमन्त्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का.
२

णतपसा कलौपापसमाकुले ॥ आयुष्यपुण्यरहिते कथंभवति
तद्वद ॥ १२ ॥ श्रीशिवउवाच ॥ विनामंत्रं विनास्तोत्रं विनै
वतपसाप्रिये ॥ विनाक्लेशादिभिर्देवि व्रतदुःखादिभिर्विना १३
विनाबलिंविनान्यासं भूतसुद्धिंविनाप्रिये ॥ विनाध्यानंविना
यंत्रंविनापूजादिनाप्रिये ॥ १४ ॥ सिद्धिराशुभवेद्येन तदेवक
थ्यतेमया ॥ शून्येब्रह्माण्डगोलेतु पंचाशच्छून्यमध्यगे ॥ १५ ॥

स.
२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचशून्यैस्थितातारा सर्वान्तकालिकास्थिता ॥ अनन्तकोटि
ब्रह्माण्डं राजदन्ताग्रकेशिवे ॥ १६ ॥ स्थाप्यशून्यालयंकृत्वा
कृष्णवर्णविधायच ॥ महानिर्गुणरूपातु वाचातीतापराकला
॥ १७ ॥ क्रीडयाशून्यरूपंतुभर्तारंतुप्रकल्पयेत् ॥ सृष्टेरारंभ
कार्यार्थं दृष्टाछायातदातया ॥ १८ ॥ इच्छाशक्तिस्तुसाजाता
तयाकालोविनिर्मितः ।प्रतिबिंबंतत्रदृष्टंजाताज्ञानाभिधातुसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का. ॥ १९ ॥ इदमेतत्किंविशिष्टं जातंविज्ञानकंयदा ॥ तदाक्रि
३ याद्विधाजाता तदिच्छातोमहेश्वरि ॥ २० ॥ ब्रह्माण्डगोळंदेवे स.
शि राजदन्तास्थितंतुयत् ॥ साक्रियास्थापयामास स्वस्वस्थान
क्रमेणतु ॥ २१ ॥ तत्रैवश्वेच्छयादेवि मामरस्यपरायणा ॥ य
दिच्छाकथ्यतेदेवि यथावदवधारय ॥ २२ ॥ युगादिसमयेदे ३
वि शिवंपरगुणोत्तमम् ॥ तदिच्छानिर्गुणंशान्तं सच्चिदानन्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विग्रहम ॥ २३ ॥ शाश्वतंसुन्दरंशुभ्रं सर्वदेवयुतंपरम् ॥ आदि
नाथंगुणातीतं काल्यासंयुतमीश्वरम् ॥ २४ ॥ विपरीतरतंदेवं
सामरस्यपरायणम् ॥ पूजार्थमागतान्देवान्गंधर्वाप्सरसाङ्गणा
न् ॥ २५ ॥ यक्षिणीकिन्नरीमर्त्त्यास्सर्वैस्याद्यास्तिलोत्तमा ॥
वीक्ष्यतन्मायया प्राह सुन्दरीप्राणवल्लभे ॥ २६ ॥ त्रैलोक्यसुन्द
रीप्राण स्वामिनिप्राणरञ्जनि ॥ किमागतंभवत्त्याद्य ममभाग्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का. ४ ण्ठोमहान् ॥ २७ ॥ उक्त्वामौनधरंशम्भूंपूजयन्त्यप्सरोगणाः
अप्सराऊचुः ॥ संहारात्तारितंदेव त्वयाविश्वजनप्रिय ॥ २८ ॥ स.
सृष्टेरारम्भकार्यार्थं मुक्तोसिमहाप्रभो ॥ वेश्याकृत्यमिदंदेव
मंगलार्थंप्रगायनम् ॥ २९ ॥ प्रयाणोत्सवकालेतुसमारम्भेप्रगा
यनम् ॥ युगाद्यारम्भकालोहि वर्त्ततेमृडशङ्कर ॥ ३० ॥ इन्द्रा ४
णीकोटयःसन्ति तस्याप्रसवाविन्दुतः ॥ ब्रह्माणीवैष्णवीनांचमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेशीनांचकोटयः ॥ ३१ ॥ तवसामरसानन्दं दर्शनार्थंसमुद्भवाः
संजातास्त्वग्रतोदेवचास्माकंसौख्यसागरः ॥ ३२ ॥ रतिंहित्वा
कामिनीनां नान्यत्सौख्यंमहेश्वर ॥ सारतिर्दृश्यतेस्माभि र्मह
त्सौख्यार्थकारिका ॥ ३३ ॥ एवमेवतुचास्माभिः कर्त्तव्यंभर्तृ
णासह ॥ एवंश्रुत्वामहादेवो ध्यानावस्थितमानसः ॥ ३४ ॥
ध्यानंहित्वामाययातु प्रोवाचकालिकांप्रति ॥ भैरवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का. कालिकालिमुण्डमाले प्रिये भैरवनादिनि ॥ ३५ ॥ शिवारूप
धरे क्रूरे घोरदंष्ट्रे भयानके ॥ त्रैलोक्यभक्षणकरि सुन्दर्यः सन्ति
९ तेग्रतः ॥ ३६ ॥ सुन्दरीवीक्ष्यणं कर्म कार्यकालप्रियोशिवे ध्या स.
नं मुंच महादेवि तागच्छन्ति गृहं प्रति ॥ ३७ ॥ तवरूपं महाका
लिमहाकालप्रियंकरम् । एतासां सुन्दरं रूपं त्रैलोक्यप्रियकारक ९
म् ॥ ३८ ॥ एवं मायाभ्रमाविष्टो महाकालोवदन्निति ॥ इदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालवचः श्रुत्वा कालं प्राह च कालिका ॥ ३९ ॥ मायया छाद्य चा
त्मानं निजस्त्रीरूपधारिणी ॥ इतः प्रभृति स्त्रीमात्रं भविष्यंति
युगे युगे ॥ ४० ॥ वल्ल्या द्यौषधयो देवि दिवा वल्लिस्वरूपतां ॥
रात्रौ स्त्रीरूपमासाद्य क्रीडान्ति च परस्परम् ॥ ४१ ॥ अज्ञानं चै
व सर्वेषां भविष्यन्ति युगे युगे ॥ एवं शापं प्रदत्वा तु पुनः प्रोवाच का
लिका ॥ ४२ ॥ विपरीतरतीं कृत्वा चिन्तयन्ति भजान्ति ये ॥ ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का. षां वरं प्रदास्यामि तत्र नित्यं वसाम्यहम् ॥ ४३ ॥ इत्युक्त्वा का
लिका विद्या तत्रै वान्तरधीयत ॥ त्रिंशन्निखर्व षड्वृन्द नवत्य स.
६ र्वुद कोटयः ॥ ४४ ॥ दर्शनार्थं तपस्तेपे सावैकुत्रगता प्रिये ॥ म
म प्राणप्रिया देवि हाहा प्राणप्रिया मम ॥ ४५ ॥ किं करोमि क्व ग
च्छामि इत्येवं भ्रमसंकुलः ॥ तदा काल्याः कृपा जाता ममाचिन्ता ६
परः शिवः ॥ ४६ ॥ यंत्र प्रस्तारबुद्धिस्तु काल्यादत्ताऽतिसत्वरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्त्रंजातंतदारभ्य पूर्वविज्ञानगोचरे ॥ ४७ ॥ श्रीचक्रराज
प्रस्ताररचनाभ्यासतत्परः ॥ इतस्ततोभ्राम्यमाणस्त्रैलोक्यंच
क्रमध्यगम् ॥ ४८ ॥ चक्रपारंदर्शनार्थं कोट्यर्बुदयुगंगतम् ।
भक्तप्राणप्रियादेवी तदाश्रीचक्रनायिका ॥ ४९ ॥ तत्रबिन्दोः
परंरूपंसुन्दरंसुमनोहरम् ॥ रूपंजातंमहेशानि जाग्रत्त्रिपुरसु
न्दरी ॥ ५० ॥ रूपंदृष्ट्वामहादेवो राजराजेश्वरोह्यभूत् ॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्याकटाक्षमात्रेण तस्यारूपधरः शिवः ॥ ५१ ॥ विनाशृङ्गा
रसंयुक्तातदाजातामहेश्वरी ॥ विनाकाल्यंशतोदेविजगत्स्था
वरजङ्गमम् ॥ ५२ ॥ नशृङ्गारोनशक्तित्वंकापिनास्तिमहेश्व
रि ॥ सुन्दर्यांप्रार्थिताकाली तुष्टाप्रोवाचकालिका ॥ ५३ ॥
सर्वेषां नेत्रकेशेषु ममांशोत्रभविष्यति ॥ पूर्वावस्थासुदेवेशि
ममांशास्तिष्ठतिप्रिये ॥ ५४ ॥ सावस्थातरुणाख्याता तदन्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवातिष्ठति ॥ मन्द्भक्तानांमहेशानि सदातिष्ठतिनिश्चितं ५५
शक्तिस्तु कुण्ठताजाता तथारूपं नसुन्दरम् ॥ चिन्ताविष्ठा
तिमालिना जातातत्रतु सुन्दरी ॥ ५६ ॥ क्षणंस्थित्वाध्यान
परा कालीचिन्तन तत्परा ॥ तदाकाली प्रसन्नाभूत्क्षणार्द्धेन
महेश्वरि ॥ ५७ ॥ वरंब्रूहिवरंब्रूहि वरंब्रूहीति सादरम् ॥ सु-
न्दर्य्युवाच ॥ ममशक्तिंपरांदेहि वरोयंप्रार्थितोमया ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८ तादृगुपायंकथय येनशक्तिर्भविष्यति ॥ श्रीकाल्युवाच ॥ म
मनामसहस्रंचमयापूर्वंविनिर्मितम् ॥ ५९ ॥ मत्स्वरूपंकका स.
राख्यं महासाम्राज्यनामकम् । वरदानाभिदंनामक्षणाद्धीद्धर
दायकम् ॥ ६० ॥ तत्पठस्वमहामाये तवशक्तिर्भविष्यति ॥
ततःप्रभृतिश्रीविद्या तन्नामपाठतत्परा ॥ ६१ ॥ तदेवनामसा
हस्रं सुन्दरीशक्तिदायकम् ॥ कथ्यतेपरयाभक्त्या साधयस्व ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेस्वरि ॥ ६२ ॥ मद्यैर्मांसैस्तथाशुक्रैः सर्वरक्तैरपिप्रिये ॥ तर्प
येत्पूजयेत्कालीं विपरीतरतिंचरेत् ॥ ६३ ॥ विपरीतरतौदेवि
कालीतिष्ठतिनित्यशः । माध्वीकशुक्रपुष्पातुमैथुनानुरागि
णी ॥ ६४ ॥ वैश्नविव्यापिकाविद्या श्मशानवासिनीपरा ॥ वी
रसाधनसन्तुष्टा वीरास्फालननिनादिनी ॥ ६५ ॥ शिवाबलिप्र
हृष्टात्मा शिवारूपादिचण्डिका ॥ कामानन्दपरास्त्रोत्र प्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना.

१ यामत्यूग्रमानसा ॥ ६६ ॥ ब्रह्मानन्दपरासान्द्रमैथुनानन्दतो
षिणी । योगीन्द्रहृदयागारा दिवानिशिविपर्यया ॥ ६७ ॥ स.
विपरीतानिशिदिवा विपरीतरतातुरा ॥ क्षणात्तुष्टा च
प्रत्यक्षो दन्तमाला जपप्रिया ॥ ६८ ॥ खड्गहस्तोमु
क्तकेशो दिगम्बरविभूषितः ॥ शय्यास्थश्चुम्बनानन्दी
वेश्यासङ्गपरायणः ॥ ६९ ॥ पठेत्सहस्रनामाख्यं मेधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साम्राज्यनामकम् ॥ यथादिव्यामृतैर्दिव्या प्रसन्नाक्षणमा
त्रतः ॥ ७० ॥ तथानेनमहाकाली प्रसन्नापाठमात्रतः ॥ क
थ्यतेनामसाहस्रं सावधानमनाश्शृणु ॥ ७१ ॥ सर्वसाम्राज्य
मेधाख्य नामसाहस्रकस्यच ॥ महाकालऋषिप्रोक्तरुष्णिक्छ
न्दःप्रकीर्तितः ॥ ७२ ॥ देवतादक्षिणाकाली मायाबीजंप्रकी
र्तितम् ॥ हूँशक्तिःकालिकाबीजंकीलकंपरिकीर्त्तितम् ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का.

१०

कालिकावरदानादि स्वेष्टार्थे विनियोगत ॥ कर्पूरेण षडङ्गा
नि षड्दीर्घाढ्येन कारयेत् ॥ ७४ ॥ ध्यानंच पूर्ववत्कृत्वा साध
येत्स्वेष्टदेवतां ॥ * ॥ ॐ अस्य श्री सर्वसाम्राज्यमेधानामसह
स्रस्य महाकालऋषिरुष्णिक्छन्दो दक्षिणाकाली देवता ह्रीं बी
जं हूँ शक्तिः क्रीं कीलकं कालिका वरदानादि स्वेष्टार्थे विनियो-
गः ॥ ॥ ॥ ॥ क्रां अङ्गुष्ठाभ्यां नमः क्रीं तर्जनीभ्यां न

स.

१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मः क्रूंमध्यमाभ्यांबषट् क्रैँअनामिकाभ्याहुम् क्रौँकनिष्ठ-
काभ्यांबौषट् क्रः करतलकरपृष्ठाभ्यांफट् क्राँहृदयायनमः
क्रींशिरसेस्वाहा क्रुँशिखायैबषट् क्रैंकवचायहुँ क्रौँनेत्रत्रयाय
बौषट् क्रः अस्त्रायफट् ॥ ॐक्रींकाली क्रूंकरालीच कल्याणी
कमला कला ॥ कलावती कलाख्याच कलापूज्याकलात्मि
काः ॥ ७५ ॥ कलादृष्टा कलापुष्टा कलाकाष्टाकलापरा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का० कलाकोटिसमाभासाकलाकोटिप्रपूजिता ॥ ७६ ॥ कलामयी स०
कलाधारा कलापाराकलागमा ॥ कलासाराकमलिनी कका-
११ राकरुणाकरी ॥ ७७ ॥ ककारवर्णसर्वांगी कलाकोटीविभूषि
ता ॥ ककारकोटिगुणिता ककारकोटिभूषणा ७८ ककारवर्ण
त्हृद्या ककारमनुमण्डिता ॥ ककारवर्णमुकुटा ककारवर्ण
भूषिता ७९ ककारवर्णरूपाच ककशब्दपरायणा ॥ करवीरा ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्फालरता कमलाकरपूजिता ॥ ८० ॥ कमळाकरनाथाच क
मळाकररूपधृक् ॥ कमलाकर सिद्धिस्था कमलाकरपारदा
॥ ८१ ॥ कमलाकरमध्यस्था कमलाकरतोषिता ॥ कथंकारप
रालापा कथंकारपरायणा ॥ ८२ ॥ कथंकारपदान्तस्था कथं
कारपदार्थभूः ॥ कमलाक्षीकमलजा कमळाक्षप्रपूजिता ८३
कमलक्षाबराद्युक्ता ककारकर्बुराक्षरा ॥ करताराकरच्छिन्ना क

CC-0. In Public Domain. Digitization by eGangotri

का.

रश्यामाकरार्णवा ॥ ८४ ॥ करपूज्याकररताकरदाकरपूजिता
३२ करतोयाकरामर्शा कर्मनासाकराप्रिया ॥ ८५ ॥ करप्राणक स.
रकजाकरकाकरकान्तरा ॥ करकाचलरूपाच करकाचलशो
भिनी ॥ ८६ ॥ करकाचलपुत्रीच करकाचलतोषिता ॥ कर
काचलगेहस्थाकरकाचलरक्षिणी ॥ ८७ ॥ करकाचलसन्मा
न्या करकाचलकारिणी ॥ करकाचलवर्षाढ्याकरकाचलरंजि ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ता ॥ ८८ ॥ करकाचलकान्ताराकरकाचलमालिनी ॥ करका
चलशोभाढ्या करामलकरूपिणी ॥ ८९ ॥ करामलकसंस्था
च करामलकसिद्धिदा ॥ करामलकसंपूज्या करामलकतारि
णी ॥ ९० ॥ करामलककालीच करामलकलोचर्नी ॥ करा
मलकमाताच करामलकसेविनी ॥ ९१ ॥ करामलकविज्ञेया
करामलकदायिनी ॥ कंजनेत्राकंजगतिः कंजस्थाकंजधारि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णी ॥ ९२ ॥ कंजमालाप्रियकरि कंजरूपा चकंजजा ॥ कंज
 जातिःकंजगतिःकंजहोमपरयणा ॥ ९३ ॥ कंजमण्डलमध्य
स्थाकंजाभरणभूषिता ॥ कंजसन्माननिरता कंजोत्पत्तिपरा
यणा ॥ ९४ ॥ कंजराशिसमाकारा कंजारण्यनिबासिनी ॥ क
रंजवनमध्यस्था करंजवृक्षवासिनी ॥ ९५ ॥ करंजफलभूषा
ढ्या करंजारण्यबासिनी ॥ करंजमालाभरणाकरबालपरायणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९६ ॥ करवालप्रहृष्टात्मा करवालप्रियागतिः ॥ करवालप्रि
याकण्ठा करवालप्रहारिणी ॥ ९७ ॥ करवालमयीकर्मा कर
वालप्रियंकरी ॥ कवंधमालाभरणा कवन्धराशिमध्यगा ९८
कवंधकूटसंस्थाना कवंधानन्तभूषणा ॥ कबंधनादसंतुष्टा क
बंधासनधारिणी ॥ ९९ ॥ कवंधगृहमध्यस्था कवन्धवनवा
सिनी ॥ कवंधकांचीकरणी कबंधराशिभूषणा ॥ १०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कवंधमालाजपदा कवंधदेहवासिनी ॥ कवंधा सनेमान्याच
१४ कपालमाल्यधारिणी ॥ १ ॥ कपालमालामध्यस्था कपाळव्र १४
ततोषिता ॥ कपालदीपसंतुष्टा कपालदीपरूपिणी ॥ २ ॥
कपालदीपवरदा कपालकज्जळस्थिता ॥ कपालमालाजयदा
कपालजपतोषिणी ॥ ३ ॥ कपालसिद्धिसन्तुष्टा कपालभोज
नोद्यता ॥ कपालव्रतसंस्थाना कपालकमलालया ॥ ४ ॥ कवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वामृतसाराच कवित्वामृतसागरा ॥ कवित्व सिद्धिसंहृष्टा
कवित्वादानकारिणी ॥५॥ कविपूज्याकविगतिःकविरूपाक
विप्रिया ॥ कविब्रह्मानन्दरूपा कवित्वव्रततोषिता ॥ ६ ॥ क
विमानससंस्थाना कविवाञ्छाप्रपूरिणी ॥ कविकण्ठस्थिताकँ
ह्रीँक्रूँकँकँकविपूर्त्तिदा ॥ ७ ॥ कज्जलाकज्जलादान मानसाक
ज्जलप्रिया ॥ कपाळकज्जलसमा कज्जळेशप्रपूजिता ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कज्जलार्णवमध्यस्था कज्जलानन्दरूपिणी ॥ कज्जलप्रियसन्तु
१५ ष्टा कज्जलप्रियतोषिणी ॥ ९ ॥ कपालमालाभरणा कपालकर
भूषणा ॥ कपालकरभूषाढ्या कपालचक्रमंडिता ॥ १० ॥ क
पालकोटिनिलया कपालदुर्गकारिणी ॥ कपालगिरिसंस्थाना
कपालचक्रवासिनी ॥ ११ ॥ कपालपात्रसन्तुष्टा कपालार्घ्यप
रायणा ॥ कपालार्घ्यप्रियाप्राणा कपालार्घ्यवरोद्यता ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपालचक्ररूपाच कपालरूपमात्रगा ॥ कदलीकदळीरूपा
कदली वनवासिनी ॥ १३ ॥ कदली पुष्प सुप्रीता कदली
फल मानसा ॥ कदली होमसन्तुष्टा कदली दलनोद्यता
॥ १४ ॥ कदलि गर्भ मध्यस्था कदलिवन सुन्दरी ॥ कदम्व
पुष्पनिलया कदम्ववनमध्यगा ॥ १५ ॥ कदम्वकुसुमामोदा
कदम्ववनतोषिणी ॥ कदम्वपुष्पसंपूज्या कदम्वपुष्पहोमदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ कदम्बपुष्पमध्यस्था कदम्ब फलभोजिनी ॥ कदम्ब
काननान्तस्था कदम्बाचलवासिनी ॥ १७ ॥ कच्छपा कच्छपा
राध्या कच्छपासनसंस्थिता ॥ कर्णपूरा कर्णनाशा कर्णाटिका
लभैरवी ॥ १८ ॥ करप्रीता कलहदा कलहा कळहातुरा ॥
कर्णयक्षी कर्णवार्त्ता कथनी कणसुन्दरी १९ कर्णपिशाचिनी
कर्णमंजरी कपिकच्छुदा ॥ कपिकच्छुविरूपाढ्या क[illegible]कच्छु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपिणी ॥ २० ॥ कस्तूरीमृगसंस्थाना कस्तूरी मृगरूपिणी
कस्तूरीमृगसंतोषा कस्तूरीमृगमध्यगा ॥ २१ ॥ कस्तूरीर[illegible]नी
लांगी कस्तूरीगंधतोषिता कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रि
या २२ कस्तूरीप्रेमसन्तुष्टा कस्तूरीप्राणधारिणी ॥ कस्तूरीपू
जकानन्दा कस्तूरिगन्धरूपिणी ॥ २३ ॥ कस्तूरीमालिका
रूपा कस्तूरीभोजनप्रिया ॥ कस्तूरी तिलकानन्दा कस्तूरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिलकप्रिया ॥ २४ ॥ कस्तूरीहोमसंतुष्टा कस्तूरीतर्पणोद्यता ॥
कस्तूरीमार्जनोद्युक्ता कस्तूरीचक्रपूजिता ॥ २५ ॥ कस्तूरीपु
१७ ष्पसंपूज्या कस्तूरीचर्वणोद्यता ॥ कस्तूरीगर्भमध्यस्था क
स्तूरीवस्त्रधारिणी ॥ २६ ॥ कस्तूरीकामोदरता कस्तूरीवनवा
सिनी ॥ कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी ॥ २७ ॥ क
स्तूरीशक्तिनिलया कस्तूरीशक्तिकुण्डगा ॥ कस्तूरीकुण्डसंस्ना १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताकस्तूरीकुण्डमज्जना ॥ २८ ॥ कस्तूर्यर्घ्यैणसन्तुष्टा कस्तूरी
जीवधारिणी ॥ कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा २९
कस्तूरीज्ञातिभावस्था कस्तूरीगंधचुम्बना ॥ कस्तूरीगंधसंशो
भि विराजितकपोलभूः ॥ ३० ॥ कस्तूरीमदनान्तस्था कस्तूरी
मदहर्षदा ॥ कस्तूरीकावितानाढ्या कस्तूरी गृहमध्यगा ३१
कस्तूरीस्पर्शकप्राणा कस्तूरीनिन्दकान्तका ॥ कस्तूर्यामोदर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिका स्कतूरीक्रीडनोद्यता ॥ ३२ ॥ कस्तूरीदानानिरता कस्तू
१८ रविरदायिनी॥कस्तूरीस्थापनासक्ताकस्तूरीस्थानरंजिनी ३३
कस्तूरीतिलकप्ररुना कस्तूरीस्तुतिबान्दिता ॥ कस्तूरीबंधकाधा
रा कस्तूरीस्थानवासिनी ॥ ३४ ॥ कहरूपाकहाढ्याच कहान
न्दाकहात्मभूः ॥ कहपूज्याकहेळाख्याकहहेषा कहात्मिका १८
३५ कहमालाकण्ठभूषा कहमंत्रजपोद्यता ॥ कहनाम स्मृति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परा कहनामपरायणा ॥ ३६ ॥ कहपारायणरता कहदेवी
कहेश्वरी ॥ कहहेतुःकहानन्दा कहनादपरायणा ॥ ३७ ॥ क
हमाताकहान्तस्था कहमन्त्राकहेश्वरा ॥ कहगेहाकहाराध्या
कहध्यानपरायणा ॥ ३८ ॥ कहतंत्राकहकहा कहचर्यापरा
यणा ॥ कहाचाराकहगतिः कहताण्डवकारिणी ॥ ३९ ॥ क
हारण्याकहगतिः कहशक्तिपरायणा ॥ कहराज्यरताकर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का० साक्षिणिकर्मसुन्दरी ॥ ४० ॥ कर्मविद्याकर्मगतिः कर्मतंत्र स०
१९ परायणा ॥ कर्ममात्राकर्मगात्रा कर्मधर्मपरायणा ॥ ४१ ॥
कर्मरेखानाशकर्त्री कर्मरेखाविनोदिनी ॥ कर्मरेखामोहक-
री कर्मकीर्त्तिपरायणा ॥ ४२ ॥ कर्मविद्याकर्मसारा कर्मधा
राचकर्मभूः ॥ कर्मकारीकर्महारी कर्मकौतुकसुन्दरी ॥ ४३ ॥
कर्मकालीकर्मतारा कर्मछिन्नाचकर्मदा ॥ कर्मचाण्डालिनी १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्म वेदमाताचकर्मभूः ॥ ४४ ॥ कर्मकाण्डरतानन्ता क-
र्मकाण्डानुमानिता ॥ कर्मकाण्डपरीणाहा कमठीकमठाकृ-
तिः ॥ ४५ ॥ कमठाराध्यहृदया कमठाकण्ठसुन्दरी ॥ क
मठासनसंसेव्या कमठीकर्मतत्परा ॥ ४३ ॥ करुणाकरका-
न्ताच करुणाकरवन्दिता ॥ कठोरकरमालाच कठोरकु-
चधारिणी ॥ ४७ ॥ कपर्दिनीकमाठिनी कठिनीकङ्कभूष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णा ॥ करभोरूः कठिनदा करभा करभालया ॥ ४८ ॥
 करभाषामयीकल्पा कल्पनाकल्पदायिनी ॥ कमलस्थाक-
लामाला कमलास्याक्वणत्प्रभा ॥ ४९ ॥ ककुद्मिनीकष्टवती
कच्छकच्छार्चिताकचा ॥ कचार्चिताकचतनुः कचसुन्दर-
धारिणी ॥ १५० ॥ कठोरकुचसंलग्ना कटिसूत्रविराजिता ॥
कणभक्षप्रियाकन्दा कथाकन्दगतिःकलिः ॥ ५१ ॥ कलिघ्नी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलिदूतीच कविनायकपूजिता ॥ कशाकक्षानियंत्रीच क-
श्चित्कविवरार्चिता ॥ ५२ ॥ कर्त्रीचकर्तृकाभूषा करणीकर्ण-
शत्रुपा ॥ करणेशीकरणदा कलनांवाकलानिधि ॥ ५३ ॥ कल-
दाकलनाधारा करीकाकरकाकरा ॥ कळगेयाकर्कराशिः कर्क-
राशिप्रपूजिता ॥ ५४ ॥ कन्याराशिःकन्यकाच कन्यकाप्रिय-
भाषिणी ॥ कन्यकादानसन्तुष्टा कन्यादानप्रतोषिणी ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का० कन्यादानकरानन्दा कन्यादानगृहेष्टदा ॥ कर्षणाकक्षदह- स०
२१ ना कामिताकमलासना ॥ ५६ ॥ करमालानन्दकर्त्री क-
रमालाप्रतोषिता ॥ करमालाशयानन्दा करमाळासमागमा
॥ ५७ ॥ करमालासिद्धिदात्री करमाळाकराप्रिया ॥ कर-
प्रियाकररता करदानपरायणा ॥ ५८ ॥ करनन्दाकलिग-
तिः कलिपूज्याकलिप्रसूः ॥ करानन्दाकविगतिः कविपू- २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्याकविप्रसूः ॥ ५९ ॥ कलनादाविनादस्था कलना-
दवरप्रदा ॥ कलनादसमाजस्था कहोलाचकहोलदा ॥
१६० ॥ कहोळगेहसंस्थाच कहोळवरदायिनी ॥ कहोल-
कविताधारा कहोलऋषिमानिता ॥६१ ॥ कहोळमानसा-
राध्या कहोलवाक्यकारिणी ॥ कहोलगेहमध्यस्था कहो-
लवरकारिणी ॥ ६२ ॥ कर्तृरूपाकर्तृमयी कर्तृमाताचक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क० र्तरी ॥ कनीयाकानिकाराध्या कनीनकमयीतथा ॥ ६३ ॥ स०
२२ कनीयानन्दानिलया कानिकानन्दतोषिता ॥ कनीनकक-
राकाष्ठा कथार्णवकरीकरिः ॥ ६४ ॥ करिगम्याकरिगतिः
करिध्वजपरायणा ॥ करिनाथप्रियाकण्ठा कथानकप्रतो-
षिता ॥ ६५ ॥ कमनीयाकमनका कमनीयविभूषणा ॥
कमनीयसमाजस्था कमनीयव्रतप्रिया ॥ ६६ ॥ कमनी- २२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यगुणाराध्या कपिळाकपिलेश्वरी ॥ कपिळाराध्यत्हृदया
कपिळाबरदायिनी ॥ ६७ ॥ कएईलह्रींस्वरूपाच कएई-
लह्रींवरप्रदा ॥ कएईलह्रींसिद्धिदात्री कएईलह्रींस्वरूपि-
णी ॥ ६८ ॥ कएईलह्रींमंत्रवर्णा कएईलह्रींप्रसूकला ॥
कवर्गाचकपाटस्था कपाटोद्घाटनक्षमा ॥ ६९ ॥ कङ्का-
लीचकपालीच कङ्कालप्रियभाषिणी ॥ कङ्कालभैरवाराध्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का० कङ्कालमानसंस्थिता ॥ १७० ॥ कङ्कालमोहनिरता कङ्का- स०
२३ लमोहदायिनी ॥ कलुषघ्नीकलुषहा कलुषार्तिविनाशिनी-
॥ ७१ ॥ कलीपूज्याकलादाना कशिपुःकश्यपार्चिता ॥
कश्यपाकश्यपाराध्या कलिपूर्णकलेवरा ॥ ७२ ॥ कलेव-
रकरीचैव कवर्णाचकरालका ॥ करालभैरवाराध्या करा-
लभैरवेश्वरी ॥ ७३ ॥ करालाकरणाधारा कपर्दीशवरप्रदा २३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ कपर्दीशप्रेमरता कपर्दीमालिकायुता ॥ ७४ ॥ कपर्दी-
जपमालाढ्या करवीरप्रसूनदा ॥ करवीरप्रियप्राणा करवीर-
प्रपूजिता ॥ ७५ ॥ कर्णिकारसमाकारा कर्णिकारप्रपूजि-
ता ॥ करीषाग्निस्थिताकर्षा कर्षमात्रसुवर्णदा ॥ ७६ ॥ क-
लशाकलशाराध्या कषायाकरिगानदा ॥ कपिलाकलकंठी-
च कलिकल्पलतामता ॥ ७७ ॥ कल्पळताकल्पमाता क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्पकारीचकल्पभूः ॥ कर्पूरामोदरुचिरा कर्पूरामोदधारिणी
२४ ॥ ७८ ॥ कर्पूरमालाभरणा कर्पूरवासपूर्तिदा ॥ कर्पूरमाळा-
जपदा कर्पूरार्णवमध्यगा ॥ ७९ ॥ कर्पूरतर्पणरता कर्पूर-
वरधारिणी ॥ कपटेश्वरसंपूज्या कपटेश्वररूपिणी ॥ १८० ॥
कद्रुः कपिध्वजाराध्या कलापपुष्परूपिणी ॥ कलापपुष्परु-
चिरा कलापपुष्पपूजिता ॥ ८१ ॥ क्रकचाक्रकचाराध्या २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंभ्रमाकरालता ॥ कथंकारविनिर्मुक्ता कालीकालप्रिया
क्रतुः ॥ ८२ ॥ कामिनीकामिनीपूज्या कामिनीपुष्पधारिणी
॥ कामिनीपुष्पनिलया कामिनीपुष्पपूर्णिमा ॥ ८३ ॥ का-
मिनीपुष्पपूजार्हा कामिनीपुष्पभूषणा ॥ कामिनीपुष्पतिल-
का कामिनीकुण्डचुंबना ॥ ८४ ॥ कामिनीयोगसन्तुष्टा का-
मिनीयोगदायिनी ॥ कामिनीकुण्डसंमग्ना कामिनीकुण्डम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ध्यगा ॥ ८५ ॥ कामिनीमानसाराध्या कामिनीमानतोषि-
 ता ॥ कामिनीमानसञ्चारा कालिकाकालकालिका ॥ ८६ ॥
कामाचकामदेवीच कामेशीकामसंभवा ॥ कामभावाकामर
ता कामार्त्ताकाममञ्जरी ॥ ८७ ॥ काममञ्जीररणिता काम-
देवप्रियान्तरा ॥ कामकालीकामकेला कालीकामकलाभि-
धा ॥ ८८ ॥ कादिकामकलाकाली कालानलसमप्रभा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पान्तदहनाकान्ता कान्ताराप्रियभाषिणी ॥ ८९ ॥ का-
लपूज्याकालरता कालमाताचकालिनी ॥ कालवीराकाल-
घोराकालसिद्धाचकालदा ॥ १९० ॥ कालाञ्जनसमाकारा
कालिञ्जरनिवासिनी ॥ कालऋद्धिःकालसिद्धिः कारागृहवि-
मोचनी ॥ ९१ ॥ कादिविद्याकादिमाता कादिस्थाकादि-
सुन्दरी ॥ काशीकाञ्चीचकाञ्चीशा काञ्चीशवरदायिनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का० स०

॥ ६२ ॥ क्लींवीजाचैवक्लींवीज हृदयायनमस्कृता ॥ का-
म्याकाम्यगतिःकाम्य सिद्धिदात्रीचकामधुक् ॥ ६३ ॥
कामाक्षाकामरूपाच कामचापविमोचनी ॥ कामदेवकला-
रामा कामदेवकलालया ॥ ६४ ॥ कालरात्रीकामदात्रीका-
न्ताराचलवासिनी ॥ कालरूपाकालगतिः कामयोगपरायणा
॥ ६५ ॥ कामसंमर्दनरता कामगेहविकाशिनी ॥ कालभैरव-

CC-0. In Public Domain. Digitization by eGangotri

भार्याच कालभैरवकामिनी ॥ ९६ ॥ कालभैरवयोगस्था का-
लभैरवभोगदा ॥ कामधेनुःकामदोग्ध्री काममाताचकान्ति-
दा ॥ ९७ ॥ कामुकाकामुकाराध्याकामुकानन्दवर्द्धिनी ॥ का-
र्त्तवीर्याकार्त्तिकेया कार्त्तिकेयप्रपूजिता ॥ ९८ ॥ कार्याकारण-
दाकार्यकारिणीकारणान्तरा ॥ कान्तिगम्याकान्तिमयी का-
न्त्याकात्यायनीचका ॥ ९९ ॥ कामचाराचकाश्मीरा काश्मी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राचारतत्परा ॥ कामरूपाचाररता कामरूपप्रियंवदा ॥ २०० ॥

कामरूपा कामासिद्धा कामरूपमनोमयी ॥ कार्त्तिकी कार्त्ति-
काराध्या काञ्चनारप्रसूनभूः ॥ १ ॥ काञ्चनारप्रसूनाभा का-
ञ्चनारप्रपूजिता ॥ काचरूपा काचभूमिः कांश्यपात्रप्रभोजि-
नी ॥ २ ॥ कांश्यध्वनिमयी काम सुन्दरी कामचुंवना ॥ का-
शपुष्पप्रतीकाशा कामद्रुमसमागमा ॥ ३ ॥ कामपुष्पा-
२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामभूमिः कामपूज्याचकामदा ॥ कामदेहाकामगेहा का-
मराजपरायणा ॥ ४ ॥ कामध्वजसमारूढा कामध्वजसमा-
स्थिता ॥ काश्यपीकाश्यपाराध्या काश्यपानन्ददायिनी ॥
५ ॥ कालिन्दीजलसङ्काशा कालिन्दीजलपूजिता ॥ का-
देवपूजानिरता कादेवपरमार्थदा ॥ ६ ॥ कर्मणाकार्मणा-
कारा कामकार्मणकारिणी ॥ कार्मणत्रोटनकरी का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किनीकारणाह्वया ॥ ७ ॥ काव्यामृताचकालिङ्गा काली-
ङ्गमर्दनोद्यता ॥ कालागुरुबिभूषाढ्या कालागुरुबिभूषिता
॥ ८ ॥ कालागुरुसुगन्धाच कालागुरुप्रतर्पणा ॥ कावेरीनी-
रसंप्रीता कावेरीतीरबासिनी ॥ ९ ॥ कालचक्रभ्रमाकारा का-
लचक्रनिबासिनी ॥ काननाकाननाधारा कारुःकारुणिकाम-
यी ॥ १० ॥ कांपील्यबासिनीकाष्ठा कामपत्नीचकामभूः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ कादंबरीपानरता तथाकादंबरीकळा ॥ ११ ॥ कामबन्द्या-
चकामेशी कामराजप्रपूजिता ॥ कामराजेश्वरीविद्या काम-
कौतुककौमदी ॥ १२ ॥ कांबोजजाकांक्षितेदा काश्याका-
ञ्चनकारिणी ॥ काञ्चनाद्रिसमाकारा काञ्चनाद्रिप्रदानदा
॥ १३ ॥ कामकीर्त्तिःकामकेशीकालिकाकान्तराश्रया ॥ का-
मभेदीचकामार्त्ति नाशिनीकामभूमिका ॥ १४ ॥ कालनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशिनीकाव्य बनिताकामरूपिणी ॥ कामस्थाकाष्ठसदी-
प्तिः काव्यदाकाव्यसुन्दरी ॥ १५ ॥ काष्ठशीकारणबरा का-
मारिपूजनोद्यता ॥ काञ्चीनूपुरभूषाढ्या कुंकुमाभरणो-
द्यता ॥ १६ ॥ काळचक्राकालगतिः काळचक्रमनोभवा ॥
॥ कुञ्जमध्याकुञ्जपुष्पा कुञ्जपुष्पाप्रियाकुजा ॥ १७ ॥ कुञ्ज-
माताकुजाराध्या कुठारबरधारिणी ॥ कुञ्जरस्थाकुशरता कु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेशयबिलोचना ॥ १८ ॥ कुनटीकुररीकुद्धा कुरङ्गीकुटजा
ह्वया ॥ कुंभीनिशाबिभूषाच कुंभीनिशबधोद्यता ॥ १९ ॥ कुं
भकर्णमनोह्लासा कुलचूडामणिःकुला ॥ कुलालगृहकन्न्या
चकुलचूडामणिप्रिया ॥ २० ॥ कुलपूज्याकुलाराध्या कु-
लपूजापरायणा ॥ कुचभूषातथाकुक्षिकुररीगणसेबिता २१
कुलपुष्पाकुलरता कुलपुष्पपरायणा ॥ कुलबस्त्राकुलारा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का० ध्या कुलकुण्डसमप्रभा ॥ २२ ॥ कुलकुण्डसमुल्लासा कुण्ड- स०
पुष्पपरायणा ॥ कुण्डपुष्पप्रहसना कुण्डगोलोद्भवात्मिका
३० ॥ २३ ॥ कुण्डगोलोद्भवाधारा कुण्डगोलमयीकुहूः ॥ कुण्ड-
गोलप्रियप्राणा कुण्डगोलप्रपूजिता ॥ २४ ॥ कुण्डगोलम
नोल्लासा कुण्डगोलबरप्रदा ॥ कुलदेवरताकुद्धा कुलसिद्धिक
रीपरा ॥ २५ ॥ कुळकुण्डसमाकारा कुलकुण्डसमानभूः ॥ ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुण्डसिद्धिकुण्डऋद्धिः कुमारीपूजनोद्यता ॥ २६ ॥ कुमारी
पूजकप्राणा कुमारीपूजकालया ॥ कुमारीकामसन्तुष्टा कु-
मारीपूजकात्मिका ॥ २७ ॥ कुमारीव्रतसन्तुष्टा कुमारीरू-
पधारिणी ॥ कुमारीभोजनप्रीता कुमारीचकुमारदा
॥ २८ ॥ कुमारमाताकुलदा कुलयोनिकुलेश्वरी ॥ कु-
ललिङ्गाकुलानन्दा कुलरम्याकुतर्कधृक् ॥ २९ ॥ कुन्तीच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुलकान्ताच कुलमार्गपरायणा ॥ कुल्लाचकुरुकुल्लाच कुल्ल-
३१ काकुळकामदा ॥ ३० ॥ कुसालिङ्गीकुब्जिकाच कुब्जिकानन्द-
वर्द्धिनी ॥ कुलीनाकुञ्जरगतिः कुञ्जरेश्वरगामिनी ॥ ३१ ॥ कु
लपालिःकुलगतिः तथैवकुलदीपिका ॥ कुलयोगीश्वरीकुण्डा
कुंकुमारुणाविहाग्रहा ॥ ३२ ॥ कुंकुमानन्दसन्तोषा कुंकुमार्ण-
ववासिनी ॥ कुंकुमाकुसुमप्रीता कुलभूंकुलसुन्दरी ॥ ३३ ॥ ३१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुन्ददन्ती कुमुदिनी कुशला कुलटालया ॥ कुलटालयमध्यस्था
कुलटासङ्गतोषिता ॥ ३४ ॥ कुलटाचुंबनोद्युक्ता कुशोवार्त्ता-
कुलार्णवा ॥ कुलार्णवाचाररता कुण्डली कुण्डलाकृतिः ॥ ३५ ॥
कुमतिश्च कुलश्रेष्ठा कुलचक्रपरायणा ॥ कूटस्था कूरदृष्टिश्च कुन्ते
लाकुन्तलाकृतिः ॥ ३६ ॥ कुशलाकृतिरूपा च कुर्चबीजधरा-
चकुः ॥ कुकुकुकुशब्दरता कूँकँकँपरायणा ॥ ३७ ॥ कुंकु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कुंशब्दानिलया कुक्कुरालयवासिनी ॥ कुक्कुराशब्दसंयुक्ता कुक्कु-
रानन्दाविग्रहा ॥ ३८ ॥ कूर्चारंभा कूर्चवीजा कूर्चजापपरायणा
 कुलिनी कुलसंस्थाना कूर्चकुण्डपरागतिः ॥ ३९ ॥ कूर्चवीज-
भालदेशा कूर्चमस्तकभूषिता ॥ कुलवृक्षगता कूर्मा कूर्माचल-
निवासिनी ॥ २४० ॥ कुलविन्दुः कुलशिवा कुलशक्तिपरायणा
कुलविन्दुमणिप्रख्या कुलद्रुमनिवासिनी ॥ ४१ ॥ कुचम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्दनसन्तुष्टा कुचजापपरायणा ॥ कुचस्पर्शनसन्तुष्टा कुचा-
लिङ्गनतत्परा ॥ ४२ ॥ कुगतिघ्नीकुबेरार्च्या कुचभूः कुलना-
यिका ॥ कुगायना कुचधरा कुगीता कुन्ददन्तिका ॥ ४३ ॥
कुगेया कुहराभासा कुगेया कुघ्नदारिका ॥ कीर्तिः किरातिनी
क्लिन्ना किरणा किन्नरीप्रिया ॥ ४४ ॥ क्रींकारा क्रींजपासक्ता
क्रींहूँह्रींमंत्ररूपिणी ॥ किर्मीरीतदृशापाङ्गी किसोरार्चा कि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का० रीटिनी ॥ ४५ ॥ कीटभाषाकीटयोनिः कीटमाताचकीटदा ॥ स०
३३ किंशुकाकिरभाषाच क्रियासाराक्रियावती ॥ ४६ ॥ कीकी
शब्दपराक्लांक्लीं क्लूंक्लैंक्लौंमंत्ररूपिणी ॥ क्रांक्रींक्रूंक्रैंस्वरूपाच क्रः
फट्मंत्रस्वरूपिणी ॥ ४७ ॥ केतकीभूषणानन्दा केतकीभर-
णान्विता ॥ केकराकौशिनीकेशी केशीसूदनतत्परा ॥ ४८ ॥
केशरूपाकेशमुक्ता कैकेयीकौशिकीतथा ॥ कैरवाकैरवाह्लादा ३३

केशराकेतुरूपिणी ॥ ४९ ॥ केशवाराध्यत्हृदया केशवाशक्त
मानसा ॥ क्लैंब्यनिर्नाशिनी क्लैंब्या क्लैंबीजजपतोषिता २५०
कौशलाकोशलाक्षीच कोशाचकोमलातथा ॥ कोलापुरनिवा-
सीच कोलापुरविनाशिनी ॥ ५१ ॥ कोटरूपाकोटरता क्रो-
धिनीकाकरूपिणी ॥ केकाचकोकिलाकोटिः कोटिमंत्रप-
रायणा ॥ ५२ ॥ कोट्यनन्तमन्त्रयुता केरूपाकेरलाश्रया ॥

CC-0. In Public Domain. Digitization by eGangotri

केरलाचारनिपुणा केरलेन्द्रगृहस्थिता ॥ ५३ ॥ केदाराश्च-
मसंस्थाच केदारेश्वरपूजिता ॥ क्रोधरूपाक्रोशपादा क्रोध-
माताचकौशिकी ॥ ५४ ॥ कोदण्डधारिणीक्रौंचा कौशल्या
कोमलाङ्गना ॥ कौलिनीकौलिकाधारा कौलिकाननवासिनी
॥ ५५ ॥ कौतुकीकौमदीकौला कौमारीकौरवार्चिता ॥ कौ-
ण्डिन्याकौशलीक्रोध ज्वालाभास्वररूपिणी ॥ ५६ ॥ कोटि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालानलज्वाला कोटिमार्त्तण्डविग्रहा ॥ कृत्तिकाकृष्णवर्णा-
च कृष्णाकृत्त्याक्रियातुरा ॥ ५७ ॥ कृशाङ्गीकृतकृत्याच क्रः
फट्स्वाहास्वरूपिणी ॥ क्राँक्राँहूँफट्मन्त्रवर्णा क्रींहूँह्रींफट्
नमस्वधा ॥ ५८ ॥ क्रींक्रींह्रींह्रींतथाहूँहूँफट्स्वाहामन्त्ररू-
पिणी ॥ इतिश्रीसर्वसाम्राज्य मेधानामसहस्रकम् ॥ ५९ ॥
सुन्दरीशक्तिदानाख्यं स्वरूपाभिधमेवच ॥ कथितंदक्षिणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालया सुन्दर्य्यैप्रीतियोगत: ॥ २६० ॥ वरदानप्रसङ्गेनरहस्य
मपिदर्शितम् ॥ गोपनीयंसदाभक्त्या पठनीयंपरात्परं ६१
प्रातर्मध्याह्नकालेच सन्ध्यार्द्धरात्रयोरपि ॥ पूजाकालेजपा
न्तेच पठनीयंविशेषत: ॥ ६२ ॥ य:पठेत्साधकाधीश: काली
रूपोहिवर्षत: ॥ पठित्वापाठयेद्वापि शृणोतिश्रावयेदपि ६३
वाचकन्तोषयेद्वापि सभवेत्कालिकातनु ॥ सहेलम्बासलीलं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बा यःकश्चिन्मानवःपठेत् ॥ ६४ ॥ सर्वदुःखविनिर्मुक्तः त्रै-
लोक्यविजयीकविः ॥ मृतबन्ध्याकाकबन्ध्या कन्याबन्ध्या
चबन्ध्यका ॥ ६५ ॥ पुष्पबन्ध्याशूलबन्ध्या शृणुयात्स्तो-
त्रमुत्तमम् ॥ सर्वसिद्धिःप्रदातारं सत्कविंचिरजीविनम् ६६
पण्डितेन्द्रंकीर्तियुतं लभतेनात्रसंशयः ॥ यद्यत्काममुपस्कृ-
त्य कालीन्ध्यात्वाजपेत्स्तवम् ॥ ६७ ॥ तंतंकामंकरेकृत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मन्त्रीभवतिनान्यथा ॥ योनिपुष्पैर्लिङ्गपुष्पैः कुण्डगोलो-
द्भवैरपि ॥ ६८ ॥ संयोगामृतपुष्पैश्च वसुदेवीप्रसूनकैः ॥
कालीपुष्पैःपीठतोयै योनिक्षालनविन्दुभिः ॥ ६९ ॥ क-
स्तूरीकुंकुमैर्देवी नखकालगुरूकमात् ॥ अष्टगंधैर्धूपदीपै
र्जवायावकसंयुतैः ॥ ७० ॥ रक्तचन्दनासिन्दूरै र्मत्स्यमां-
सादिभूषणैः ॥ मधुभिःपायसैःक्षीरैः शोधितैःशोणितैरपि ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७१ ॥ महोपचारैरक्तैश्च नैवेद्यैषड्रसान्वितैः ॥ पूजयित्वा
महाकालीं महाकालेनलालिताम् ॥ ७२ ॥ विद्याराज्ञींकु-
ल्लुकाञ्च जप्त्वास्तोत्रंपठेच्छिवे ॥ कालीभक्तःस्त्वेकचित्तः
सिन्दूरतिलकान्वितः ॥ ७३ ॥ ताम्बूलपूरितमुखो मुक्तके-
शोदिगम्बरः ॥ शवयोनिस्थितोवीरः श्मशानसुरतान्वितः
॥ ७४ ॥ शून्यालयेविन्दुपीठे पुष्पाकीर्णेशिवावने ॥ श्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेऽथप्रभुञ्जानः कालीदर्शनमाप्नुयात् ॥ ७५ ॥ तत्रयद्यत्कृ- स०
तंकर्म तदनन्तफलंलभेत् ॥ ऐश्वर्य्यैकमलासाक्षात् सिद्धौ-
श्रीकालिकाम्बिका ॥ ७६ ॥ कवित्वेतारिणीतुल्यः सौन्द-
र्य्येसुन्दरीसमः ॥ वस्रोद्धारासमःकाव्ये श्रुतौश्रुतिधरोयथा
॥ ७७ ॥ ब्रह्मास्त्रइवदुर्धर्ष त्रैलोक्यविजयास्त्रवित् ॥ शत्रुह-
र्त्ताकार्यकर्त्ता भवेच्छिवसमःकलौ ॥ ७८ ॥ दिग्विदिक्कन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्ताच दिवारात्रिविपर्यये ॥ महादेवसमोयोगी त्रैलोक्य
स्तम्भकःक्षणात् ॥ ७९ ॥ गानेचतुम्बुरुःसाक्षाद्दानेकर्णसमो
भवेत् ॥ गजाश्वरथपत्तीनामस्त्राणामधिपःकृती ॥ ८० ॥ आ
युधेतुभुसुण्डीच जरापलितनाशकः ॥ वर्षषोडशवान्भूयात्
सर्वकालंमहेश्वरी ॥ ८१ ॥ ब्रह्माण्डगोलदेवेशि नतस्यदुर्लभं
क्वचित् ॥ सर्वंहस्तगतंभूयान्नात्रकार्याविचारणा ॥ ८२ ॥ कु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लपुष्पयुतंदृष्ट्वा तत्रकालींविचिन्त्यच ॥ विद्याराज्ञीञ्चसंपू-
ज्य पठेन्नामसहस्रकम् ॥ ८३ ॥ मनोरथमयीसिद्धिस्तस्य
हस्तेसदाभवेत् ॥ परदारान्समालिंग्य संचुंव्यपरमेश्वरि ८४
हस्ताहस्तिकयायोगं कृत्वाजप्त्वास्तवंपठेत् ॥ योनिंवीक्ष्य
जपेत्स्तोत्रं कुवेरादाधिकोभवेत् ॥ ८५ ॥ कुण्डगोलोद्भवंगृह्य
पुर्णाक्तंहोमयेन्निशि ॥ पितृभूमौमहेशानि विधिरेखांविमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जंयेत् ॥ ८६ ॥ तरुणींचञ्चलांरम्यां सुन्दरींकामगर्विताम् ॥
समानीयप्रयत्नेन संशोध्यन्यासयोगतः ॥ ८७ ॥ प्रसूनमञ्चे
संस्थाप्य पृथ्वींविकासितांचरेत् ॥ मूलचक्रन्तुसंभाव्य देव्या
चरणसंयुतम् ॥ ८८ ॥ संपूज्यपरमेशानि सवल्यन्तंमहेश्व-
री ॥ जप्त्वास्तुत्वामहेशानि द्राविणींसंस्मरेच्छिवे ॥ ८९ ॥
अष्टोत्तरशतैर्योनिं संमन्त्र्यचुम्व्ययत्नतः ॥ संयोगीभूयज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्व्यं सर्वविद्याधिपोभवेत् ॥ २९० ॥ शून्यालयेशिवारण्ये
शिवदेवालयेतथा ॥ शून्यदेशेतडागेच गङ्गागर्भेचतुस्पथे ९१
श्मशानेपर्वतेग्रामे एकलिङ्गेशिवामुखे ॥ कुण्डेयोनौऋतुस्ना-
ता गेहेवेश्यागृहेतथा ॥ ९२ ॥ कुट्टिनीगृहमध्येवा कदली
मण्डपेसदा ॥ पठेत्सहस्रनामाख्यं स्तोत्रंसर्वार्थसिद्धये ९३
अरण्येशून्यदुर्गेषु रणेशक्तिसमागमे ॥ कालींसंचिन्त्यप्रजपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पठेन्नामसहस्रकम् ॥ ९४ ॥ सर्वसिद्धीश्वरोभूयाद्वाञ्छासि-
द्धिंसविन्दति ॥ मृडचूडकयोर्योनि त्वचिवाकोमलेपिच ॥
॥ ९५ ॥ विष्टरेशववस्त्रेवा पुष्पवस्त्रासनेपिवा ॥ कालींसं-
चिन्त्यप्रजपे त्ततोनामसहस्रकम् ॥ ९६ ॥ पंचानन्दमयो
भूत्वा पठित्वाकालिकास्वयम् ॥ मुक्तकेशोदिशावासा मै-
थुनीशयनास्थितः ॥ ९७ ॥ जप्त्वाकालींपठेत्स्तोत्रं खेचरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धिभाग्भवेत् ॥ चिकुरंयोगमासाद्य शुक्रोत्सारणमेववा
॥ ९८ ॥ जप्त्वाश्रीदक्षिणाकाली शक्तिपातशतंभवेत् ॥ ल-
तांस्पृशञ्जपित्वातु कालिकांचिन्तयन्नपि ॥ ९९ ॥ आलो-
कयन्दिशावसां परशक्तिंविशेषतः ॥ स्तुत्वाश्रीदक्षिणाका-
लीं योनिंस्वकरगांचरेत् ॥ ३०० ॥ पठेन्नामसहस्रंयः शि-
वादप्यधिकोभवेत् ॥ लतारतेषुजप्तव्यं श्रुत्वाकालीन्निराकु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लः ॥ १ ॥ दशावधानोभवति मासमात्रेणसाधकः ॥ मा-
हारात्र्यांवीररात्र्यां कालरात्र्यांविशेषतः ॥ २ ॥ चतुर्दश्यां
तथाष्टम्यां सङ्क्रमेपिमहेश्वरी ॥ कुहुपूर्णेन्दुशुक्रेषु भौमेवा-
पिनिशामुखे ॥ ३ ॥ नवम्यांमङ्गलदिने तथाकुलतिथौशिवे
॥ कुलऋक्षेतुयत्नेन पठेन्नामसहस्रकम् ॥ ४ ॥ सोदर्शनोभ-
वेदाशुकिन्नरीसिद्धिभाग्भवेत् ॥ पश्चिमाभिमुखंलिङ्गं वृष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शून्यंपुरातनम् ॥ ५ ॥ तत्रस्थित्वाजपेत्स्तोत्रं सर्वकामाप्तये
शिवे ॥ भौमवारेनिशीथेच अमावास्यादिनेशुभे ॥ ६ ॥ माष
भक्तबलिंछागं कृशरान्नंचपायसम् ॥ दुग्धमीनंशोणितञ्च द-
धिदुग्धंगुडार्द्रकम् ॥ ७ ॥ बलिंदत्वाजपेत्तत्र त्वष्टोत्तरसह-
स्रकम् ॥ देवगन्धर्वसिद्धोघैः सेवितःसूरसुन्दरीम् ॥ ८ ॥ ल-
भेद्देवेशिमासेन तस्यचासनसंहतिः ॥ हस्तत्रयंभवेदूर्द्धा नात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्याविचारणा ॥ ९ ॥ हेलयालीलयाभक्त्या कालींस्तौ-
तिनरस्तुयः ॥ ब्रह्मादीस्तम्भयेद्देवि माहेशीमोहयेत्क्षणात्
॥ १० ॥ आकर्षयन्महाविद्यां दशपूर्वांत्रियामतः ॥ नवीन
विष्णुनिर्माणं यमादीनांचमारणम् ॥ ११ ॥ ध्रुवमुच्चाटये-
न्नूनं सृष्टिञ्चनुतनांचरेत् ॥ १२ ॥ मेषमाहिषमार्जार खर
छागनरादिकैः ॥ खड्गशूकरकापोतौष्टिद्विभैःशशकैःपलैः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोणितैःसास्थिमांसैश्च कारणैर्दुग्धपायसैः ॥ कादम्बरीसिन्धु
मद्यैः सुरारिष्टैश्चसासवैः ॥ १४ ॥ योनिक्षालननीरैश्च यो-
निलिङ्गामृतेनच ॥ स्वजातकुसुमैःपूज्य जपान्तेतर्पयेच्छिव-
वाम् ॥ १५ ॥ सर्वसाम्राज्यनाम्नातु स्तुत्वानत्वास्वशक्ति-
तः ॥ शक्त्यालयेपठेत्स्तोत्रं कालीरूपोदिनत्रयात् ॥ १६ ॥
दक्षिणाकालिकातस्य गेहेतिष्ठतिनान्यथा ॥ वेश्यालतागृहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वा तस्याश्चुम्बनतत्परः ॥ १७ ॥ तस्यायोनौमुखंदत्वा
तद्रसन्नाविलिहञ्जपन् ॥ तदन्तेनामसाहस्रं पठेद्भक्तिपरायण-
णः ॥ १८ ॥ कालिकादर्शनन्तस्य भवत्येवात्रियामतः ॥
नृत्यपात्रगृहेगत्वा मकारपञ्चकान्वितः ॥ १६ ॥ प्रसूनमञ्चे
संस्थाप्य शक्तिन्यासपरायणः ॥ पात्राणांसादनंकृत्वा दि-
ग्वस्त्रान्तांसमाचरेत् ॥ ३२० ॥ चक्रंसंभाव्यतन्मूले तत्रसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरणांयजेत् ॥ शतंभालेशतंकेशे शतंसिन्दूरमण्डले २१
 शतद्वयंकुचद्वन्द्वे शतंनाभौमहेश्वरी ॥ शतंयोनौमहेशानि
उत्थायचशतत्रयम् ॥ २२ ॥ जपेत्तत्रमहेशानि तदन्तेप्रप-
ठेत्स्तुतिम् ॥ शतावधानोभवति मासमात्रेणसाधकः २३
मातङ्गिनींसमानीय किम्वाकापालिनींशिवे ॥ दन्तमाला
जपेकार्या गलेधार्यानृमुण्डजा ॥ २४ ॥ नेत्रपद्मेयोनिचक्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तिचक्रंस्वचक्रके ॥ कृत्वाजपेन्महेशानि मुण्डयन्त्रंप्रपू-
जयेत् ॥ २५ ॥ मुण्डासनस्थितोवीरो मकारपंचकान्वित ॥
अन्यामालिंग्यप्रजपेदन्यांसंचुम्ब्यवैपठेत् ॥ २६ ॥ अन्यांसं
पूजयेत्तत्र त्वन्यांसंमर्दयन्पठेत् ॥ अन्ययोनौशिवंदत्वा पुनः
पूर्ववदाचरेत् ॥ २७ ॥ अवधानसहस्रेषु शक्तिपातशतेषुच
॥ राजाभवतिदेवेशि मासपंचकयोगतः ॥ २८ ॥ यवनींश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तिमानीय गानशक्तिपरायणा ॥ कुलाचारक्रमेणैव तस्या
योनिंविकाशयेत् ॥ २९ ॥ तत्रजिह्वांप्रदत्वाच जपेन्नामस-
हस्त्रकम् ॥ नृकपालेतत्रदीपं लाप्ययत्नेनवैपठेत् ॥ ३० ॥
महाकविवरोभूयान्नात्रकार्याविचारणा ॥ कामार्त्तांशक्तिमा
नीय योनौतुमूलचक्रकम् ॥ ३१ ॥ विलिख्यपरमेशानी त-
त्रमन्त्रंलिखेच्छिवे ॥ तल्लिहन्प्रजपेद्देवि सर्वशास्त्रार्थतत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वित् ॥ ३२ ॥ अश्रुतान्यपिशास्त्राणि वेदादीन्पाठयेद्ध्रुव-
म् ॥ विनाभ्यासैर्विनायासै र्विनापाठादिभिःप्रिये ॥ ३३ ॥
चतुर्वेदाधिपोभूत्वा त्रिकालज्ञःस्त्रिवर्षतः ॥ चतुर्विधञ्चपा-
ण्डित्यं तस्यहस्तगतंक्षणात् ॥ ३४ ॥ शिवाबलिःप्रदातव्यः
सर्वदाशून्यमण्डले ॥ कालीध्यानंमन्त्रचिन्ता नीलसाधन-
मेवच ॥ ३५ ॥ सहस्रनामपाठंच कालीनामप्रकीर्त्तनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तस्यकृत्यमेतावदन्यमभ्युदयंविदुः ॥ ३६ ॥ बीरसाधनकं
कर्म शिवापूजाबालिस्तथा ॥ सिन्दूरतिलकोदेवि वेश्यालापो
निरन्तरम् ॥ ३७ ॥ वेश्यागेहेनिशाचारो रात्रौपर्यटनंतथा ॥
शक्तिपूजायोनिदृष्टिः खड्गहस्तोदिगम्बरः ॥ ३८ ॥ मुक्त
केशोवीरवेषी ताम्बूलपूरिताननः ॥ कालीभक्तोभवेद्देवि ना-
न्यथाक्षोभमाप्नुयात् ॥ ३९ ॥ दुग्धस्वादीयोनिलेही संवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दासवघूर्णितः ॥ वेश्यालतासमायोगां मासात्कल्पलतास्व-
यम् ॥ ३४० ॥ वेश्याचक्रसमायोगात्कालीचक्रःसमस्वयम् ॥
वेश्यादेहसमायोगात्कालीदेहसमस्वयम् ॥ ४१ ॥ वेश्याम-
ध्यगतंवीरं कदापश्यामिसाधकम् ॥ एवंवदतिसाकाली त-
स्माद्वेश्यावराङ्गना ॥ ४२ ॥ वेश्याकन्न्यातदापीठ जाति
भेदकुलक्रमात् ॥ अकुलक्रमभेदेन ज्ञात्वाचैवकुमारिकाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४३॥ कुमारींपूजयेद्भक्त्या जपान्तेदेववासिये ॥ पठेन्ना-
मसहस्रंयः कालीदर्शनभाग्भवेत् ॥ ४४ ॥ भक्त्यापूज्या
कुमारीन्तु वेश्याकुलसमुद्भवाम् ॥ वस्त्रहेमादिभिस्तोष्य ज-
प्त्वास्तोत्रंपठेच्छिवे ॥ ४५ ॥ त्रैलोक्यविजयीभूयादमाच-
न्द्रप्रदर्शकः ॥ यद्यद्दत्तंकुमार्य्यैतु तदनन्तफलंलभेत् ॥४६॥
कुमारीपुजनफलं मयावक्तुंनशक्यते॥ चाञ्चल्याद्भाषितंकि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चितक्षम्यतामयमञ्जलिः ॥४७॥ एकाचेत्पूजितावाला द्वि-
तयंपूजितंभवेत् ॥ कुमार्यश्चशक्तयश्च सर्वमेतच्चराचरं ४८
शक्तिमानीयतद्गात्रे न्यासजालंप्रविन्यसेत् ॥ स्ववामभागे
संस्थाप्य पठेन्नामसहस्रकम् ॥ ४९ ॥ सर्वसिद्धीश्वरोभूया-
न्नात्रकार्याविचारणा ॥ श्मशानस्थोभवेत्स्वस्थो गलितंचि-
कुरंचरेत् ॥ ३५० ॥ दिगंबरःसहस्रञ्च सूर्यपुष्पंसमानयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्ववीर्येणयुतंकृत्वा प्रत्येकंप्रजपंहुनेत् ॥५१॥ पूज्यध्यात्वा
महाभक्त्या क्षमापालोनरःसदा ॥ नखंकेशञ्चवीर्यञ्च यद्य-
त्संमार्जनंगतम् ॥ ५२ ॥ मुक्तकेशोदिशावासो मूलमन्त्र
पुरःसरम् ॥ कुजवारेमध्यरात्रौ होमंकृत्वाश्मशानके ५३
पठेन्नामसहस्त्रंयः पृथ्वीशाकर्षणंचरेत् ॥ पुष्पयुक्तेभगेदेवी
संयोगानन्दतत्परः ॥ ५४ ॥ पुनश्चिकुरमासाद्य मूलमन्त्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपेच्छिवे ॥ चितावह्नौमध्यरात्रे वीर्यमुत्सार्ययत्नतः ॥ ५५ ॥
कालिकांपूजयेत्तत्र पठेन्नामसहस्रकम् ॥ पृथ्वीसाकर्षणंकु-
र्यान्नात्रकार्याविचारणा ॥ ५६ ॥ कदलीवनमासाद्य लक्ष्य
मात्रंजपेन्नरः ॥ मधुमत्यास्स्वयंदेव्या सेव्यमानःस्मरोपमः
॥ ५७ ॥ श्रीमन्मधुमतीत्युक्त्वा तथास्थावरजङ्गमाः ॥ क-
र्षणीतिसमुच्चार्य ठठस्वाहासमुच्चरेत् ॥ ५८ ॥ त्रैलोक्याक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्षणीविद्या तस्यहस्तेसदाभवेत् ॥ नदीं पुरीञ्चरत्नानि हेमस्त्री
शैलभूरुहान् ॥५६ ॥ आकर्षयत्यम्बुनिधेस्सुमेरोश्चादिगन्त-
तः ॥ अलभ्यानिचवस्तूनि दूराद्भूमितलादपि ॥ ६० ॥ वृ-
त्तान्तंचपुरस्थानां रहस्यंविद्विषामपि ॥ राज्ञाञ्चकथयत्येषा
सत्यंसत्वरमाविशेत् ॥ ६१ ॥ द्वितीयवर्षपाठेन भवेत्पद्मा-
वतीपतिः ॥ ॐ ह्रीं पद्मावतिपदं ततः त्रैलोक्यनामच ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्ताञ्च कथयद्वन्द्वं स्वाहान्तोमन्त्रईरितः ॥ ब्रह्मविष्णवादिका
नांच त्रैलोक्येयादृशीभवेत् ॥ ६३ ॥ सर्ववदातिदेवेशि त्रि-
कालज्ञःकविःशुभः ॥ त्रिवर्षपाठतोदेवि लभेद्भोगवतींकलां
॥ ६४ ॥ महाकालेनदृष्टोपि चिताधूमगतोपिच ॥ तस्यद-
र्शनमात्रेण चिरजीविनरोभवेत् ॥ ६५ ॥ मृतसञ्जीविनी-
त्युक्त्वा मृतमुत्थापयद्द्वयम् ॥ स्वाहान्तोमनुराख्यातः स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वंसिद्धिस्वरोभवेत् ॥ ६६ ॥ ॐह्रींस्वप्नबाराहीकाली स्वप्ने
कथय चोच्चरेत् ॥ अमुकस्यामुकन्देहि क्रींस्वाहान्तो मनुर्म-
तः ॥६७॥ स्वप्नसिद्धाचतुर्बर्षा त्तस्यस्वप्नेसदास्थिता ॥ च-
तुर्बर्षस्यपाठेन चतुर्वेदाधिपोनरः ॥ ६८ ॥ तद्वक्त्रजलसंयो-
गाद्वृक्षःकाव्यंकरोतिच ॥ तस्यवाक्यपरीचयान्मूर्तिर्वदति-
भारतीम् ॥ ६९ ॥ प्रस्तरेतुकरंदत्वा वदवाणीमितिब्रुवन् ॥ सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धकोवाञ्छयाकुर्वंस्तत्तथैवभविष्यति ॥ ७० ॥ ब्रह्माण्डगो-
लकेयाच याकाचिज्जगतीतले ॥ समस्तासिद्धयोदेवि करा-
मलकवद्भवेत् ॥ ७१ ॥ साधकःस्मृतिमात्रेण यावन्त्यःस-
न्तिसिद्धयः ॥ स्वयमायान्तिपुरतो जपादीनान्तुकाकथा ॥
७२ ॥ निदेशवर्तिनोभूत्वा वर्तन्तेचेटकाइव ॥ अमायांच-
न्द्रसन्दर्शश्चन्द्रग्रहणमेवच ॥ ७३ ॥ अष्टम्यांपूर्णचन्द्रत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रसूर्याष्टकंतथा॥ अष्टदिक्षुतथाचाष्टौ करोत्येवमहेश्वरी॥
७४॥ अणिमाखेचरत्वंच चराचरपुरीगतिः॥ पादुकाख-
ड्गवेताल यक्षिणीगुह्यकादयः॥ ७५॥ तिलकोगुप्तताद्दश्य
चराचरकथानकम्॥ मृतसञ्जीविनीसिद्धिर्गुटिकाचरसायन-
म्॥ ७६॥ उड्डीनांसिद्धिर्देवेशि षष्ठिसिद्धिस्वरत्वकम्॥
तस्यहस्तेभवेद्देवि नात्रकार्याविचारणा॥ ७७॥ कैतौवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुन्दुभौवस्त्रे वितानेवेष्टनेगृहे ॥ भित्तौचफलकेपीठे लेख्यं-
पूज्यंप्रयत्नतः ॥ ७८ ॥ मध्यचक्रंदशाङ्गोक्तं परितोनाम-
लेखनम् ॥ तद्धारणान्महेशानि त्रैलोक्यविजयीभवेत् ७९
एकोहिशतसाहस्रं निर्जित्यचरणाजिरे ॥ पुनरायाति-
चसुखं स्वगृहंप्रतिपार्वती ॥ ३८० ॥ एकोहिशतसन्दर्शी
लोकानांभवतिध्रुवम् ॥ कलशंस्थाप्ययत्नेन नामसाहस्रकं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठेत् ॥ ८१ ॥ सेकःकार्य्योमहेशानी सर्वापत्तिनिवारणम्
॥ भूतप्रेतग्रहादीनाम् रक्षसांब्रह्मरक्षसाम् ॥ ८२ ॥ वेता-
लानांभैरवानां स्कन्दवैनायकादिकान् ॥ नाशयेत्क्षणमा-
त्रेण नात्रकार्य्याविचारणा ॥ ८३ ॥ भस्माभिमन्त्रितंकृ-
त्वा ग्रहग्रस्तेंविलेपयेत् ॥ भस्मसंलेपनादेवि सर्वग्रहनिवारण
म् ॥ ८४ ॥ नवनीतंचाभिमन्त्र्य स्त्रीणांदद्यान्महेश्वरि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंध्यापुत्रवतीदेवि नात्रकार्याविचारणा ॥ ८५ ॥ कण्ठेवा-
वामवाहौवा योनौवाधारणाच्छिवे ॥ वहुपुत्रवतीनारी शु-
भगाजायतेध्रुवम् ॥ ८६ ॥ पुरुषोदक्षिणाङ्गेच धारयेत्सर्व-
सिद्धये ॥ कण्ठेवाहौचशिरसि ह्रदयेनाभिगोचरे ॥ ८७ ॥
कटिस्थानेशिखायांच धारयेत्सर्वसिद्धये ॥ वलवान्कीर्तिमा-
न्धन्यो धार्मिकःसाधकःकृती ॥ ८८ ॥ वहुपुत्रीरथानांच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गजानामधिपःकृती ॥ कामिनीकर्षणोद्युक्तः क्रींचदक्षिण-
कालिके ॥ ८९ ॥ क्रींस्वाहाप्रजपेन्मंत्र मयुतंनामपाठकः
॥ आकर्षणञ्चरेद्देवि जलखेचरभूगतान् ॥ ३९० ॥ वशी-
करणकामोहि हूँहूँह्रींह्रींचदक्षिणे ॥ कालिकेपूर्वबीजानि
पूर्ववत्प्रजपन्पठन् ॥ ९१ ॥ उर्वशीमपिवशयेन्नात्रकार्य्या
विचारणा ॥ क्रींदक्षिणेकालिकेच्चेति स्वाहायुक्तंजपेन्नरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९२ ॥ पठेन्नामसहस्रञ्च त्रैलोक्यंमोहयेद्ध्रुवम् ॥ सत्पु-
त्रायप्रदातव्यं विद्याराज्ञीप्रवेदिने ॥ ९३ ॥ सुविनीताय-
शान्ताय दान्तायातिगुणायच ॥ भक्तायज्येष्ठपुत्राय गुरु-
भक्तिपरायच ॥ ९४ ॥ भक्तभक्तायययोग्याय शक्तिभक्तिप
रायच ॥ एतत्सहस्रनामाख्यं स्वयंकाल्याप्रकाशितम् ९५
वैष्णवायविशुद्धाय शिवावालिरतायच ॥ वेश्यापूजनयुक्ताय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमारीपूजकायच ॥ ९६ ॥ दुर्गाभक्तायशैवाय महाकाल-
प्रजापिने ॥ अद्वैतभावयुक्ताय कालीभक्तिरतायच ॥ ९७ ॥
गुरुदैवतमंत्राणां महेशस्यापिपार्वति ॥ अभेदेनस्मरेन्मंत्रं
सशिवोनात्रसंशयः ॥ ९८ ॥ योमंत्रंभावयेन्मंत्री सशिवः
सचगाणपः ॥ सशाक्तोवैष्णवशान्त सएवपूर्णदीक्षितः ९९
अयोग्यायनदातव्यं सिद्धिरोधःप्रजायते ॥ वेश्यास्त्रीनिन्द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कायाथ मुरासम्वित्प्रनिन्दने ॥ ४०० ॥ सुरामुखीमनुंस्मृ-
त्वा सुराचावतरिष्यति ॥ वाग्बृत्ताघोरेआःस: परमघोरेच-
हुँवदेत् ॥ १ ॥ घोररूपेमहाघोरे मुखीभीमपदंवदेत् ॥ भी-
षण्यमुकषष्ठ्यन्तं हेतुत्रयुतंपिव ॥ २॥ शिवंवह्नियुगास्त्रञ्च
हुंहःफट्चमनुर्वदेत् ॥ एतस्यास्मरणादेव दुष्टानांचमुखेसु-
राः ॥ ३ ॥ अवतीर्णाभवेद्देवि नात्रकार्याविचारणा ॥ ख-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 लायपरतंत्राय परनिन्दापरायच ॥ ४ ॥ भ्रष्टायदुष्टसत्त्वाय
 परवादपरायच ॥ शिवाभक्तायदुष्टाय परदाररतायच ५
नस्तोत्रंदर्शयेद्देवि शिवहत्त्याकरोभवेत् ॥ कालिकानन्द-
त्हृदयः कालिकासक्तमानसः ॥ ६ ॥ कालीभक्तोभवेत्सो-
ऽपि धन्यरूपःसएवतु॥ कलौकालीकलौकाली कलौकालीतु-
केवला ॥ ७ ॥ कलौकालीकलौकाली कलौकालीवरप्रदा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विल्वपत्रसहस्राणि करवीराणिचैवतथा ॥ ८ ॥ प्रतिनाम्ना-
पूजयेद्धि तेनकालीवरप्रदा ॥ कमलानांसहस्रञ्च प्रति-
नाम्नासमर्पयेत् ॥ ९ ॥ चक्रंसंपूज्यदेवेशि कालिकावरमा-
प्नुयात् ॥ मंत्रक्षोभयुतेदेवि कलशस्थजलेनच ॥ १० ॥
नाम्नाप्रसेचयेद्देवि सर्वक्षोभविनाशकृत् ॥ तथामदनकंदेवि
सहस्रमाहरेद्व्रती ॥ ११ ॥ सहस्रनाम्नासंपूज्य कालिका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरमाप्नुयात् ॥ चक्रंविलिख्यदेहस्थं धारयेत्कालिकातनु:
॥ १२ ॥ काल्यैनिवेदितंयद्य त्तच्छेषंभक्षयेच्छिवे ॥ दिव्य
देहधरोभूत्त्वा कालीदेहस्थिताभवेत् ॥ १३ ॥ नैवेद्यनिन्द-
कान्दुष्टान् दृष्ट्वानृत्यन्तिभैरवा: ॥ योगिन्यश्चमहावीरा
रक्तपानोद्यता:सदा ॥ १४ ॥ मांसास्थिचर्वणोद्युक्ता भक्ष-
यन्तिनसंशय: ॥ तस्मान्ननिन्देमनसा कर्मणावचसाकिमु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ अन्यथाकुरुतेयस्तु तस्यपातोभविष्यति ॥ क्रम-
दीक्षायुतानांच सिद्धिर्भवतिनान्यथा ॥ १६ ॥ मन्त्रक्षोभ-
श्चवाभुयात् क्षीणायुर्वाभवेद्ध्रुवम् ॥ पुत्राहारीचस्त्रीहारी
राज्यहारीभवेद्ध्रुवम्॥ १७॥ क्रमदीक्षायुतोदेवि क्रमाद्रा-
ज्यमवाप्नुयात् ॥ एकवारंपठेद्देवि सर्वपापविनाशनम् १८
द्विवारंप्रपठेद्योहि वाञ्छांविन्दतिनित्यशः ॥ त्रिवारंप्रपठे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यस्तु वागीशसमतांव्रजेत् ॥ १९ ॥ चतुर्वारंपठेद्देवि चातु-
र्वण्याधिपोभवेत् ॥ पञ्चवारंपठेद्देवि पंचकामाधिपोभवेत् ॥
॥ ४२० ॥ षड्वारंम्पठेद्देवि षडैश्वर्य्यमयोभवेत् ॥ सप्तवा-
रंपठेद्देवि कामानांचिंतितांलभेत् ॥ २१ ॥ वसुवारंपठेद्देवि
दिगीशोभवतिध्रुवम् ॥ नववारंपठेद्देवि नवनाथसमोभवेत्
॥ २२ ॥ दशबारंपठेद्देवि दासार्हखेचरेश्वरः ॥ विंशद्वारंकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्तयेद्यः सर्वैश्वर्यमयो भवेत् ॥ २३ ॥ पंचविंशतिवारैस्तु सर्वचिंता
विनाशकः ॥ पंचाशद्वारमावृत्त्य पंचभूतेश्वरो भवेत् २४
शतवारं कीर्त्तयेद्यः शतानन्दसमानधीः ॥ शतपंचकमावृत्य
राजराजेश्वरः कलौ ॥ २५ ॥ सहस्रावर्त्तनाद्देवि लक्ष्मीरावृणुते-
स्वयम् ॥ त्रिसहस्रं समावृत्य त्रिनेत्रसदृशद्युतिः ॥ २६ ॥ पंचसह
स्रावर्त्तनात्तु कामकोटीविमोहनः ॥ दशसहस्रावर्त्तनात्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेद्दशमुखेश्वरः ॥ २७ ॥ पंचविंशत्सहस्रेण चतुर्विंशति-
सिद्धिभुक् ॥ लक्ष्यावर्तनमात्रेण लक्ष्मीपतिसमोभवेत् २८
लक्ष्यत्रयावर्त्तनात्तु महादेवंविजेष्यति ॥ लक्ष्यपंचकमा-
वृत्य कलापंचकसंयुतः ॥ २९ ॥ दशलक्ष्यावर्त्तनात्तु द-
शविद्याधिरुत्तमाः ॥ पंचविंशतिलक्ष्यैस्तु दशविद्येश्वरोभवे
त् ॥ ३० ॥ पंचाशल्लक्ष्यमावृत्त्य महाकालसमोभवेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोटिमावर्त्तयेद्यस्तु कालींपश्यतिचक्षुषा ॥ ३१ ॥ वरदा-
नाद्युक्तपराम् महाकालसमन्विताम् ॥ प्रत्यक्षंपश्यतिशिवे
तस्यदेहेवसेद्ध्रुवम् ॥ ४३२ ॥ श्रीविद्याकालिकातारा त्रि-
शक्तिविषयेपठेत् ॥ त्रिशक्तिविषयेदेवि क्रमदीक्षाप्रकीर्तिता
॥ ३३ ॥ क्रमदीक्षायुतोदेवि राजाभवतिनिश्चितम् ॥ विधे-
र्लिपिन्तुसंमार्ज्य किंकरत्वांविसृज्यच ॥ ३४ ॥ महाराज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मवाप्नोति नात्रकार्याविचारणा ॥ क्रमदीक्षाविहीनस्य फलं
पूर्वंमयोदितम् ॥ ३५ ॥ क्रमदीक्षायुतोदेवि शिवएवनसंश-
यः ॥ क्रमदीक्षासमायुक्तः कल्पोक्तसिद्धिभाग्भवेत् ॥ ३६ ॥
क्रमदीक्षाविहीनस्य सिद्धिहानिःपदेपदे ॥ अहोधन्यवतांम-
ध्ये धन्यःक्रमयुतःकलौ ॥ ३७ ॥ तत्रापिधन्योदेवेशि नाम
साहस्रपाठकः ॥ दशकालीविधौदेवि स्तोत्रमेतत्सदापठेत् ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धिंविन्दतिदेवेशि नात्रकार्याविचारणा ॥ कलौकालीम-
हाविद्या कलौकालीतुसिद्धिदा ॥ ३९ ॥ कलौकालीसुसि-
द्धाच कलौकालीवरप्रदा ॥ कलौकालीसाधकस्य दर्शनार्थं
समुद्यता ॥ ४० ॥ कलौकालीकेवलास्यां नात्रकार्याविचा-
रणा ॥ नान्याविद्यानान्यविद्या नान्याविद्याकलौभवेत् ४१
कलौकालींविहायाथ यःकश्चित्सिद्धिकामुकः ॥ सतुशक्तिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनादेवि रतिसंभोगमिच्छति ॥ ४४२ ॥ कलौकालींविना
देवि यःकश्चित्कार्यमिच्छति ॥ सनीलसाधनंत्यक्त्वा परि
भ्रमतिसर्वतः ॥ ४३ ॥ कलौकालींविहायाथ यःकश्चिन्मोक्ष
मिच्छति ॥ गुरुध्यानंपरित्यज्य सिद्धिमिच्छतिसाधकः ४४
कलौकालींविहायाथ यःकश्चिद्राज्यमिच्छति ॥ सभोजनं
परित्यज्य क्षुन्निवृत्तिमभीप्सति ॥ ४५ ॥ सधन्यःसचबि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानी सएवसुरपूजितः ॥ सदीक्षितःसुखीसाधुः सत्यबादि
जितेन्द्रियः ॥ ४६ ॥ सबेदबक्तास्वाध्यायी सर्बानन्दपराय
णः ॥ स्वस्मिंकालींतुसंभाव्य पूजयेज्जगदम्बिकाम् ४७ त्रै-
लोक्यबिजयीभूया त्रात्रकार्य्याबिचारणा ॥ गुरुरूपंशिवं-
ध्यात्वा शिवरूपंगुरुंस्मरेत् ॥ ४८ ॥ सदाशिवःसएवस्या त्रा
त्रकार्य्याबिचारणा ॥ गोपनीयंगोपनीयं गोपनीयंप्रयत्नतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४९ ॥ रहस्यातिरहस्यञ्च रहस्यातिरहस्यकम् ॥ श्लो-
कार्द्धंपादमात्रंबा पादार्द्धञ्चतदर्धकम् ॥ ५० ॥ नामार्द्धंबाप
ठेद्देवि नबन्ध्यंदिबसञ्चरेत् ॥ पुस्तकंपूजयेद्भक्त्या त्वावृ-
त्तिफलसिद्धये ॥ ५१ ॥ नचमारिभयंतत्र नचाग्निबातसंभ-
वम् ॥ नभूतादिभयंतत्र सर्वत्रसुखमेधते ॥ ५२ ॥ कुंकुमाल-
क्तकेनैव रोचनागुरुयोगतः ॥ भूर्जपत्रेलिखेत्पुस्त सर्वं कामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थसिद्धये ॥ ५३॥ धारयेत्पूजयेद्भक्त्या स्थापयेद्गृहमध्यतः
॥ नाग्निचैवभयंतत्र नचौरादिविशेषतः ॥ ५४ ॥ इतिगदितम
सेषं कालिकावर्णरूपं प्रपठतियादिभक्त्या सर्वसिद्धीस्वरःस्या
त्॥ अभिनभसुखकामं सर्वबिद्याभिरामः भवतिसकलसिद्धिः
सर्वबिद्यासमृद्धिः॥ ५५ ॥ इतिसंक्षेपतःप्रोक्तं किमन्यच्छ्रोतु-
मिच्छसि ॥ ५६ ॥ इतिश्री मदादिनाथ बिरचिताया मह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालसंहितायां कालीकाल संवादे सुन्दरविरदानाख्यं क-
कारादिकालिकासहस्रनामस्तोत्रं समाप्तं संपूर्णं श्रीकाली
रक्षतु शुभंभवतु रक्षतु

इदं पुस्तकं नेपालदेशे पं० नरदेव मोतीकृष्ण शर्मणामाज्ञानुसारेण पं० कपिलदेव शर्मणा
श्रीपाशुपत मुद्रणालयेङ्कितम् संवत १९६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पं. चन्द्रकान्तशर्मा.

इति ककारादि कालिकासहस्रनामं समाप्तं

इदं पु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu